किं सौ साक्षिकः न कोपि साक्षी विद्यत इत्यर्थः साक्षिकोपि बाधः किं न स्य

५२ स्यादित्याशंक्याह नत्विति बाधः किंसाक्षिको ब्रूहि त्यसाक्षिक इष्य-

ते साक्षिरहितो बाधो नाभ्युपगंतव्योऽन्यथाऽतिप्रसंगादिति भावः

उक्तमर्थं दृष्टांतेन स्पष्टयति अपनीतेष्विति अपनीतेषु मू-

र्त्तेषु द्रव्येषु शिष्यते वियत्र प्राक्येषु बाधितेष्वंते शिष्यते यत्तदेव व-

त् मूर्तेषु गृहादिगतेषु घटादिष्वपनीतेषु गृहादिभ्यो निःसारितेषु

सत्सु यथाऽपनेतुमशक्यं नभ एकोऽवशिष्यते एवं स्वव्यतिरिक्तेषु

मूर्त्ताऽमूर्त्तेषु देहेंद्रियादिषु निराकर्तुं प्राक्येषु नेति नेतीति कृत्वा

निराकृतेषु सत्सु अंतेऽवसाने सर्वनिराकरणसाक्षित्वेन यो बो

धो सखाधरहिता आत्मेत्यर्थः नन्वद्वितीयमानस्य सर्वस्यापि
निषेधे किंचिद्भावविशिष्यते ऽतः कथं शिष्यते यत्तदेवत दित्यवशि
ष्टस्यात्मत्वमुच्यत इति शंकते सर्वबाध इति सर्वबाधेन किंचिद्व
शिष्टं किंचित्तदेवतत् भावा एवात्र निषेधंते निर्बाधिंता वदंतीहि
नाकिंचिदवशिष्यत इति वदतामापि तस्याद्वयोगसिद्ध्ययमवोऽव
विषयं ज्ञानमवश्यं अभ्युपेतव्यं अतस्तदेकास्मदाभिमतात्म
स्वरूपमित्यभिप्रायेणापरिहरति यत्रेति नाकिंचिदिति शब्दे नयच्छेत
न्यमुच्यते तदेतद्ब्रह्मेत्यर्थः नाकिंचित्यव भाववाचकेन नाचित्स्ववे
न कथं चैतन्यमुच्यत इत्याशंक्य बाधसाक्षित्वेनाविषयमभ्युपेयत्वा
दभिधायक शब्दव्यावृत्तिर्नाभिधेय इति परिहरति भावा इति
भावा एवात्र निषिध्यंते निर्बाधिंता वै क्वात्रवाधसाक्षित्वमात्म

धं=

निभाता एवन किंचित्स्फुरतीत्यादि शब्द एवमिथं त्तेनिर्वाधं बाधतहि तं स्फालिचैतन्यं तु विद्यते इत्यर्थः उक्तमर्थं स्फुटयन्नारूढं करोति अत एवेति अत एव पश्यतीति बाध्यं बाधित्वा शेषयत्यदः एवनेति नेत्यात्मेत्यतद्व्यावृत्तिरूपतः यतः साक्षिचैतन्यमबाध्यमत एवनेतिनेत्यात्मेति श्रुतिरतद्व्यावृत्तिरूपतोऽनात्मपदार्थं निराकरणद्वारेण बाध्यं निराकरणायोग्यं सद्यमिनात्मवस्तु जातं बाधित्वा निराकृत्य स्वयं निराकर्तुं अशक्यं प्रत्यक्स्वरूपं शेषयतीत्यर्थः नशेषयतीति नेतिनेतीति बोधप्रयोगं बाधितुमशक्यं अत्र शेषयतीत्युक्तं तत्र बोद्धृशं बाधितुमशक्यं दृशमशक्यमिति विवक्षायां तदुभयं विभज्य दर्शयति इदंरूपमिति इदंरूपं तद्यावत्तदुक्तं शक्यं तदखिलं अशक्यो ह्यनिदंरूपः स आत्मा बाधवर्जितः

प्रति

इदमित्थं त्वेवं रूपं दृश्यत्वेनाऽनुभूयमानं रूपं स्वरूपं यस्य देहादेस्तादृशं रूपं
तु शब्दोऽवधारणे यथावद् इति पदद्वयं सर्वदृश्योपसंग्रहार्थं एवं च सति
यद् दृश्यं तत्परिविलंत्य कृशाक्यत्त एवेत्यर्थः संपद्यते अनिदं रूपं प्रत्य
क्त्वेनेदं रूपः प्रत्यक्त्वेनेदं तया वा तु संयोगः साक्षीत्व प्रकाशत्व
कं इत्यर्थः हीति निश्चयार्थे न प्रसिद्ध घातकेन त्वं रूपत्वे नत्या
त्याज्यतां सूचयति फलितमाह सत्त्वात्मेति यो वा घटादि तद्
साक्षीस एवात्मा नाहंकारादि दृश्यं तद् इत्यर्थः भवत्यात्मनो वा
ध्यत्वं प्रकृते किमायातमित्यत आह सिद्धमिति सिद्धं ब्रह्मात्मा
सत्यत्वं ज्ञानत्वं तु परैरिति स्वयमेवानुभूतित्वादित्यादि वचनेन
स्फुटं ब्रह्मणो ब्रह्मलक्षणं यत्सत्यत्वं मामाहितं तदात्मानि
त्रं भवतु सत्यत्वं कथमित्याकाङ्क्षायां तत्पूर्वोपपादितमित्याह

पं॰दशीटी॰ ज्ञानत्वमिति स्वयमेवानुभूतित्वादित्युक्ते तेनानुभाव्यत इत्यादि पं॰टी॰का
५४ निर्वचनेनैतन्निरूपत्वं पूर्वमेवाभिहितमित्यर्थः नन्वसत्यत्वज्ञा

नत्वयोराभावनिरूपितेऽप्यानंत्यं न घटते ब्रह्मणः यौपि तस्यासिद्धेरि

त्याशंक्य ब्रह्मणोऽनंतत्वं साधयति नव्यापित्वादिति नव्यापित्वात् देश

तोऽनंतत्वं नित्यत्वात् नापि कालतः नवस्तुतोऽपि सार्वात्म्यादानंत्यं ब्र

ह्मविद्या नित्यं विभुं सर्वगतं सुसूक्ष्मं आकाशवत्सर्वगतश्च नित्यो नित्यो गत

नित्यानां चेतनश्चेतनानामिदं सर्वं यदयमात्मा सर्वं खल्विदं ब्र

ह्मैवेदं सर्वमित्यादिश्रुतिषु व्यापित्वनित्यत्वसर्वात्मत्वप्रतिपादित्वा

द्ब्रह्मणस्त्रिविधमप्यानंत्यं देशकालवस्तुकृतपरिच्छेदराहित्यम

भ्युपेतव्यमित्यर्थः न केवलं श्रुतिः किंतु युक्तितोऽपीत्याह देशका

लेति देशकालान्यवस्तूनां कल्पितत्वाच्च मायया न देशादिकृ

तोऽत्रास्तिब्रह्मानंत्यस्फुटंततः परिच्छेदहेतूनां देशकालान्यवस्तूनांमा
याकल्पितत्वाद्गंधर्वनगरादिभिर्गगनस्येवनदेशादिभिःकृतःपार
मार्थिकःपरिच्छेदोब्रह्मणिसंभवतियतोऽतोब्रह्मणआनंत्यंतावद्यु
क्तमेवमेवतदेतत्सत्यमात्माब्रह्मैवब्रह्मात्मैवात्रह्येवनाविचिकि
त्स्यमित्योंसत्यमात्मैवन्नमिंहोदेवोब्रह्मभवतिअयमात्माब्रह्मेति इ
त्यादिभिरात्मनोब्रह्मणाऽभेदश्रुतिपादनात्तस्याप्यानंत्यंसिद्धमितितात् ब्र=
पर्यं ननु जडस्यजगतोब्रह्मणमायारोपितत्वेनब्रह्मणःपरिच्छेदक
त्वाभावेपि चेतनयोर्जीवेश्वरयोर्दसंभवात्कृतपरिच्छेदवत्त्वेनाऽ
नंत्यंब्रह्मणोनसंगतइत्याशंक्यतयोरप्यौपाधिकरूपत्वेनपारमार्थि
कत्वान्नतयोरपिवास्तवपरिच्छेदहेतुत्वमित्यभिप्रायेणाह सत्यमिति
सत्यंज्ञानमनंतंयत्ब्रह्मलक्षणस्यननपनात् ईश्वरत्वंचजीवत्वंउपाधि।

पं॰ द्वयीटी॰ द्वयकल्पितं यत्सत्यारूपं ब्रह्मतत्वस्तु तदेव पारमार्थिकं तत्स्य ब्रह्मणो पं॰ दी॰ का

५५५ एतल्लोका प्रसिद्धमीश्वरत्वं जीवत्वं च तत्वद्वयमायोपाधिद्वयेन कल्पितं

५५ अतः कल्पितत्वादेव जडवत् जीवेश्वरयोरपि तत्परिच्छेदकत्वाभाव

इति भावः किं तदुपाधिद्वयमित्याकांक्षायां तदुभयं क्रमेणाद

र्शयितुं तदावीश्वरोपाधिभूतां शक्तिं निरूपयति शक्तिरिति शा

क्तिरस्त्यैश्वरी काचित्सर्ववस्तुनियामिका आनंदमयमारभ्य गूढं सर्वेषु वस्तु

षु ऐश्वरी ईश्वरोपाधिनया ईश्वरसंबंधिनी काचित्सदसत्वादिभिः

रूपैर्निर्वक्तुमशक्या सर्ववस्तुनियामिका सर्वेषामंतर्यामि ब्राह्मणो

क्तानां पृथिव्यादीनां वस्तूनां नियमनकर्त्री शक्तिरस्ति सा क्व तिष्ठति

कुतो वा नोपलभ्यते इत्यपेक्षायां नियमेनाऽनुपलभ्यमानायां तस्या अतत्व

मेव किं न स्यादित्याशंक्य जगन्नियमनाऽन्यथाऽनुपपत्त्या साऽवश्यमभ्युपे

<(अन्त्याशंक्याह आनंदेति आनंदमयादिब्रह्मांडांत सर्वेषु वस्तुषु गूढा वर्त्तते स्तोनोप

लभ्यत ×पं॰ १॰)

त्याह वस्तुधर्मा इति वस्तुधर्मानियमस्येश्वरवृत्त्या नैव यदा तदा अन्यो न्य
धर्मसांकर्याद्विप्लवेन जगत्त्वलु वह्नेरौष्ण्याप्स्वादीनां काठिन्य द्रव्यत्वा
दयो यदा प्रवृत्त्यान व्यवस्थाप्यंते तदा तेषां धर्माणां सांकर्याद्विमिश्र
णोनैकैकत्राऽवस्थानात्सर्वं जगद्विप्लवेनानियतव्यवहारविषयतां प्रा
प्नुयादित्यर्थः प्रलियेतिप्रसिद्धिं द्योतयति ननु जडाया अस्या जगन्निया
मकत्वं न युज्यत इत्याशंक्याह चिच्छायेति चिच्छायावेशतः प्रा
प्तेश्चैतन्येव विभातिसा तच्छक्तिरुपाधिसंयोगाद्ब्रह्मैवेश्वरतां व्रजेत्
माया तिर्यक्चिच्छायावेशतः चिदाभासावेशाद्धेतोनैव चेतनेत्व मा प
न्ने विभाति प्रतीयते तस्याऽस्या नियामकत्वं घटत इति भावः वस्तु
ध्र कृततर्किमायात मित्यत आह तच्छक्तीति माया चासौ पाविर्क्षे
ति कर्मधारयः सैवोपाधिस्तेन संयोगात्संबंधस्तस्माद्ब्रह्मैवमात्यादि

त्वत्वानामीश्वरत्वांसर्वज्ञत्वादिधर्मयोगित्वंजेनैव प्राप्नुयात् जीवतो प॰ टी॰ मा
पाधिभूतानांकोशानांप्रागेवाऽभिहितत्वात्तन्निमित्तकंजीवत्वमिदा
नीमाह कोशोपाधीति कोशोपाधिविवक्षायांयातिब्रह्मैवजीव
तां पितापितामहश्चैकः पुत्रपौत्रौयथाद्धतमि कोशात्मोपाधिः
कोशोपाधिस्तद्विवक्षायांपर्यालोचनायांक्रियमाणायांब्रह्मैवसत्या
दिलक्षणमेवजीवत्वांजीवव्यवहारविषयतांगच्छति नन्वेकस्यैवाविरुद्धधर्म
द्वययोगित्वंयुगपत्क्वापिदृष्टचरमित्याशंक्याह पितेति यथैकएवदेव
दत्त एकदैवपुत्रंप्रतिपिताभवतिपौत्रंप्रतिपितामहएवंब्रह्मापिकोशोपा
धिविवक्षायांजीवभवतिशक्त्युपाधिविवक्षायामीश्वरश्चभवतीत्यर्थः
वस्तुतस्तुजीवत्वमीश्वरत्वंवाब्रह्मणोनास्तीत्येतत्सदृष्टांतमाह पुत्रादे
रिति पुत्राद्यविवक्षायांनपितानापितामह तद्वन्नेशोनापिजीवःशक्ति

कोशाऽविवक्षरो इदानींमुक्तज्ञानस्यफलमाह य एवमिति यएवंब्रह्मैववेद
सब्रह्मैवभवतिस्वयं ब्रह्मणोनास्तिजन्मातः पुनरेषनजायते ४३ यस्मात्प्र
न्यक्तत्त्वस्यसंपन्नः एवमुक्तेनप्रकारेणपंचकोशविवेकपुरःसरंब्रह्मप्रा
प्यगामिनंमत्यादिलक्षणंवेदसाक्षात्करोति एषःस्वयंब्रह्मैवभवति स
योहवैतत्परमंब्रह्मवेद ब्रह्मैवभवतिब्रह्मविदाप्नोतिपरमित्यादिश्रुति
भ्यः ननुनोपिकिमित्यतआह ब्रह्मणा इति नजायतेम्रियतेवाविपश्चि
दित्यादिश्रुतेर्ब्रह्मणस्तावत् जन्मनास्तिअतएषविद्वानपिस्वात्मनस्तद्रू
पत्वाक्वानैवजायतेनचपुनरावर्ततइति श्रुतेरिति इतिपरमहं० पंच
कोशविवेकव्याख्यासमाप्ता ५

श्रीडॊं नत्वाश्रीभार० मयाऽद्वैतविवेकस्यक्रियतेपदयोजना चिकीर्षित
स्यग्रंथस्यनिष्प्रत्यूहपरिपूरणायाऽभिलाषितदेवतानत्वानुस्मरणातन

पं.दशी.टी. ५७

५७

गां मंगलमाचरन् ग्रन्थवेदान्तप्रकरणात्वात् प्रसिद्धीयमेवानुबंधचतुष्टयं सिद्धवत्कृत्य ग्रंथारंभं प्रतिजानीते ईश्वरेणेति ईश्वरेणापि जीवेन सृष्टं द्वैतं विविच्यते विवेके सति जीवेन हेयो वंधः स्फुटीभवेत् ईश्वरेणाकारणोपाधिके नांतर्यामिजीवेनापि कार्योपाधिना सृष्टमपि नाट्यरूपमत्यादितं द्वैतं जगदीशविविच्यते विभज्यप्रतिपाद्यते॥ ग्रन्थद्वैतविवेचनस्य कारकं तपरीक्षावनि:प्रयोजनत्वंवारयति विवेकइति विवेके जीवेश्वरसृष्टयोर्द्वैतयोर्विवेचने कृते सति जीवेन हेयः परित्याज्यः बंधो बंधहेतुर्द्वैतं स्फुटीभवेत् स्पष्टतां यास्यति एतावज्जीवेन हेयमिति छे: निश्चीयत इत्यर्थः नन्वीश्वरेणाज्ञीवानामेव जगद्धेतुत्वं वादिनो वर्णयन्ति कारणः कथमीश्वरस्य सृष्टत्वं मुच्यते जगत इत्याशंक्याह प्रकृतिविरोधानेदं चोद्यमित्याह पवित्रमहत्त्वाभिप्रेत्यप्रथमेवं तावत्वाकांतावर

र्य्यन्तः पठति मायांतुप्रकृतिं विद्यान्मायिनंतुमहेश्वरं मा
वी॰ यीसृजतीत्याहुः श्वेताश्वतर शाखिनः मायोपाधिकमीश्वरंप्रकृ
त्यास्मान्मायीसृजते विश्वमेतदितितस्यैवेश्वरस्य जगत्स्रष्टृत्वंश्वेता
श्वतरशाखिनोवर्णयन्तीत्यर्थः ऐतरेयोपनिषद्वाक्यमर्य्यन्तोऽनुक्रामति
आत्मावाइति आत्मावाइदमग्रआसीदितिसऐक्षत सृजाइति संकल्पनात्सृजा॥
लोकानुसएतानितिबहुचाः आत्मावाइदमेकएवाग्रआसीन्नान्यत्किं
चनमिषत्सईक्षतलोकान्नुसृजाइतिसइमाल्लोकानसृजतेत्यनेनवाक्ये
नाऽद्वैतस्यपरमात्मनः एवजगत्स्रष्टृत्वंबहुचास्त्रऐतरेयशाखाध्यायिनआहु
रित्यर्थः ईश्वरस्यजगत्कारणत्वेनैतिरीय श्रुतिरपिप्रमाणमित्यभि
प्रेत्यतद्वाक्यमर्य्यन्तः पठति खंवाय्वग्निरिति खंवाय्वग्निजलोर्वीषध्यन्न
देहाः क्रमादमी संभूताब्रह्मणस्तस्मादेतस्मादात्मनोऽखिलाः मत्या
रीय॰

पं० दशवीटी० ज्ञानमनंतं ब्रह्मेत्युपक्रम्य तस्माद्वा एतस्मादात्मन आकाशः संभूतः इत्यादि प० दी० का
५८ नाऽन्नात्पुरुषः इत्यंतेन वाक्येन गुहाहितत्वेन स्वत्वगुणकामिनां दांतमिनः ब्रह्मण आकाशादिदेहपर्यन्तं जगदुत्पन्नं इत्यभिप्रायो वा परिशेषादपि सोऽकामयत बहुस्यां प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किंचेति वाक्येन तस्यैव ब्रह्मणो जगत्सर्जने च्छापूर्वकपर्यालोचनेन जगत्स्रष्टृत्वं तित्तिरिराहेत्यर्थः छांदोग्येपि ब्रह्मणः एव जगत्स्रष्टृत्वमाननित्याह इदमग्र इति बहुस्यामहमेवातः प्रजायेयेति कामतः सपदत्तत्वाऽसृजत सर्वं जगदादित्याह तित्तिरिः इदमग्रे सदेवासीद्बहुत्वाय तदैक्षत तेजोऽब्वंन्नांडजादीनि सृजदिति च सामगाः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति स दूपसद्वितीयं ब्रह्मोपक्रम्यातदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्यादि नातस्यैव ब्रह्मणः सर्व

कंतेजोऽन्नमसृजतेत्यादिना तेषां खल्वेषां भूतानां त्रीण्येव बीजा
नि भवंत्यंडजं जीवजमुद्भिज्जमित्यादिनां ऽडजादि शरीरनिर्माणादिकं च समग्रा
वर्णयंतीत्यर्थः मुंडकोपनिषद्यपि तदेतत्सत्यं यथा सुदीप्तात्पावका
द्विस्फुलिंगाः सहस्रशः प्रभवंते सरूपाः तथाक्षराद्विविधा
सोम्य भावाः प्रजायंते तत्र चैवापियंतीत्यक्षरशब्दवाच्यात् ब्रह्मणो जगदुत्पत्तिः श्रूयत इत्याह विस्फुलिंगा इति । विस्फुलिंगा
यथा वह्नेर्जायंते तद्वदक्षरात्तथा विविधाः अंडजादि भावा इत्यर्थ
वेदान्तकौस्तुभकृतः एवं बृहदारण्यकेऽप्यव्याकृतशब्दवाच्याद् ब्रह्मणो
नामरूपात्मकं जगदुत्पन्नमिति श्रुतिमित्याह जगदिति जगत्
दव्याकृतं पूर्वमासीद्व्याक्रियताधुना द्वाभ्यां नामरूपाभ्यां
विराडादिकं तेस्फुटे तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव

३

पं॰ दशमी व्याक्रियत तासौ नामायमिदंरूपं इति वाक्येन स्पष्टः भगवान् स्य पूनां पञ्चदशीका

५८ मरूपत्वेनाऽव्याकृतशब्दवाच्यान्मायोपाधिकान्ब्रह्मणो ना

८ मरूपयस्पष्टीकरणालक्षणाभिव्यक्तिरूपा नामरूपयोर्वि

ये राडादिभूस्थूलकार्यस्पष्टताच नादिदमप्रतर्हि नामरूपाभ्यामेव

व्याक्रियतेऽसौनामायमिदं इति वाक्येनाभिहिता तेचविराड

दयश्चात्मैवेदमग्रआसीत्पुरुषविध इत्यादिना एवमेवयदिदं

किंच मिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजत इत्यनेन दर्शिता इत्य

र्थः उदाहृताभिः श्रुतिभिर्द्वैतस्य स्पष्टाभिधानानन्तरं ब्रह्मणोऽ

जीवरूपेण तत्र प्रवेशोऽप्यभिहित इत्याह कृत्वेति विराडादिशरीर

भावः स्वराट्स्वावयवस्तथा पिपीलिकावधिद्वंद्वमिति वासनेश्वरः

कृत्वा रूपान्तरं जैवं देहे प्राविशदीश्वरः इति ताः श्रुतयः प्राहुः

जीवत्वंश्चाराद्यारशात् ध्रुतत्वयाजैवं जीसंबंधिरूपांतरमविक्रियब्रह्म
णोविलक्षणाविकारिरूपमित्यर्थः देहदेहज्ञातेजीवत्वंकृतइत्यत
तश्चाह जीवत्वमिति श्चारादीनांस्वामित्वेनैवप्रेरकत्वंश्चाराद्यार
णांतस्मात्जीवरूपंकत्वाश्चाविश्चादित्युक्तं किंतदित्यपेक्षायामाह
चैतन्यमिति चैतन्यंयाधिष्ठानंलिंगदेहप्रत्ययःपुनः ।चिच्छायागिं
लदेहस्था नत्स्थोजीवउच्यते अधिष्ठानलिंगदेहकल्पनाद्यारशान्
तंयच्चैतन्यमात्तियच्चतत्रकाल्पितोदेहोयच्चतस्मिन्लिंगदेहाविद्यमा
दाभासस्तत्सघ स्तेषांत्रयाराणांसमूहोजीवपदेनोच्यतइत्यर्थः नन्वी
श्वरस्यैवजीवरूपेणाश्चविष्टस्याऽज्ञत्वदुःखित्वादिविकल्पधर्मत्वंकु
तइत्याशंक्याह माहेश्वरीति माहेश्वरीतिमायायास्तस्यानिमा
णाश्चवन् विद्यतेमोहशक्तिश्चतंजीवंमोहयत्यसौ माहेश्वरीमा

पं॰ दशी टी॰ यिनं तु महेश्वरमिति श्रुत्युक्ता महेश्वरसंबंधिनी मायाया स्तस्या निर्मा प॰ दी॰ का

६०

60

णशक्तिवत् जगत्सर्जनसामर्थ्यवन्मोहशक्तिश्च मोहनसामर्थ्यमप्या
स्तिवदेतज्जडमोहात्मकमिति श्रुतेः ततः किमित्यत आह जीवमि
ति असौ मोहनशक्तिस्तं पूर्वोक्तं जीवं मोहयति चिदानंदादिस्वरूप
ज्ञानरहितं करोति ततोऽपि किमित्यत आह मोहादिति मोहादनीश
तां प्राप्य मग्नो वपुषि शोचति ई शाद्यष्टमिदं द्वैतं सर्वमुक्तं समासतः
मोहात्पूर्वोक्तादनीशतामिष्टानिष्टप्राप्तिपरिहारयोरसामर्थ्यं प्राप्य
वपुषि मग्नः शरीरे तादात्म्याभिमानं गतः शोचति दुःखवत्वाद्यभिमा
नं करोति समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमा
न इति श्रुतेः बद्धपमात्ता सांकार्यं परिहारायद्वैतं निगमयति ई नि
शोति समासतः संक्षेपेणोत्यर्थः न तु जीवस्य द्वैतं स्वरूपत्वे

किमानमित्याशंक्याह सफान्नेति सफान्नब्रह्मरोद्दैतंजीवस्वरूपंध्र
पंचितं अन्नानि मदाज्ञानेनकर्म्मरााजनयत्पिता कर्ण्यतत्वप्रपंचित

मि॰ मित्याशंक्यसफन्नप्राद्धवाच्यैद्धत स्रष्टित्येनपाद्यर्कं सफांनानि मेधया
तयमाजनयात्पितेतिवाक्यमर्थतः संगृह्णाति अन्नानीति पिताध्यो
दष्टद्वाजगद्धुत्यादनेसर्वलोकपालकोजीवइत्यर्थः नन्वत्रसफकसर्जन
किमर्थमित्याशंक्य तद्विनियोगोप्येकमस्यसाधारणंदेवानभाजयत्
श्रीएयात्मनेकुरुतपशुभ्यएकं प्रायच्छदितिवाक्येनोक्त इत्याह मर्त्या
न्नमिति मर्त्यानिमेकं देवान्नेपश्वान चतुर्थकं अन्नत्रितयमात्मा
र्थमंत्राणांविनियोजनं विनियोजनमुक्तमितिशेषः वानिचस
प्तान्नानि एकमस्यसाधारणमितीदमेवाग्नस्यतत्साधारणामंनं
यदिदमद्यतइत्यादिनाश्यमात्मावाड्ःमयोमनोमयः प्राणमयइ

क

वं॰दशटी॰ त्यांतेनवावयसंदर्भेणो बन्दरनकंडिकाद्वयरूपेन दर्शितानित्याह श्री प॰ दी॰का
६१ ह्यादिमिति ब्रीह्यादिकं दद्युरि त्यर्मासौद्वीरंतस्यासन: वाक्यद्वा
61 राकाक्षेत्यत्र मत्यमन्त्राणामवगम्यतां ननुक्तमन्त्राणांतांजगदं
त:पतित्वेनप्रवरनिर्मितत्वान्नजीवनिर्मितधान मयुक्तमित्या
शांक्यतत्स्वरूपस्येश्वरनिर्मितस्यापियोग्यत्वाकारस्यजीवनिर्मि
तत्वान्नैवमित्याह ईश्रेनेति ईश्रेनपञ्चैतानि निर्मितानिस्व
रूपत: तथापिज्ञानकर्मभ्यांजीवात्कबीत्तदनंतां ज्ञानकर्मभ्यां
ज्ञानंविहितं प्रतिषिद्धंचदेवतापरयोषितादिविषयध्यानंकर्मचावि
हितंयज्ञादिरूपं प्रतिषिद्धं हिंसादिरूपंताभ्यामित्यर्थ: तदंनतां
तेषांब्रीह्यादिन्नाराणां नानारूपभोगोपेकस्वात्वमित्यर्थ: किमतो
भवतीतितत्राह ईश्वकार्यमिति ईश्वकार्यंजीवभोग्यंजगा

न्यामत भोग्या

द्वाभ्यां समन्वितं पितृज^न्यापायो स्थितं प्रेष्यतां जगन्मां सां नेत्यत्रोक्तं
स्त्रीस्वादिरूपं सीशाकार्यत्वेन जीवभोग्यत्वेन च द्वाभ्यां संबंधामि
त्यर्थः एकस्योभयसंबंधे दृष्टान्तमाह पितृजन्येति ईशजीव
योर्जगत्सर्जने किं साधनमित्यत आह मायेति मायावृत्यात्मको हीशा सं=
कल्पः साधनं जैवो मनोवृत्यात्मको जीवसंकल्पो भोगसाधनं ना
न्वीश्वरसृष्टवस्तुस्वरूपातिरिक्तो भोग्यत्वाकार एव नास्ति को जीवेन
सृजत इत्याशंक्याह ईशनिर्मितेति ईशनिर्मितस्य स्याद्दोवस्तुन्येकविधे
स्थितेऽपि भोक्तृधीवृत्तिनानात्वात्तद्भोगो बहुधेष्यते एकस्मिन्नेवावि
षये बहुविधो भोग उपलभ्यमानस्तत्प्रयोजकं भोग्याकारभेदं गमयती
त्यर्थः ननु सति भोगभेदे भोग्यभेदः कल्प्यतां तत एव नास्तीत्याशंक्य
सहस्रामानत्वान्मैवमित्याह दृश्यतेत्याह दृश्यत्येकोमाशोलब्धाक

प्रत्यन्योह्यलाभतः पश्यत्येवविरक्तोत्र हृष्यति न कुप्यति एको सराम
वीतं लब्ध्वा हृष्यति अन्यस्तत्याविघ्नतदलाभात् कुप्यति अत्र मतो
विषये विरक्तस्तत्तं भोगाभावं पश्यत्येव लाभाऽलाभनिमित्तको हर्ष क्रोधो च नप्रा
प्नोतीत्यर्थः के ते भोगभेदोपरक्ताः जीवसृष्टा आकारभेदा इत्यत आह
प्रियइति प्रियोऽप्रियउपेक्ष्यश्चेत्याकारामणिगास्त्रयः सृष्टजीवै
रीदृशः सृष्टरूपं साधारणांत्रिषु मणिनिष्ठाः प्रियत्वाऽप्रियत्वोपेक्ष्यत्व
रूपमाणा आकारभेदाः जीवैः सृष्टांत्रिष्वपि साधारणं वस्तुतं मणि
रूपं तदीश्वरनिर्मितं इत्यर्थः उक्तं जीवसृष्टाकारभेदमुदाहरणा
न्तरेणाप्यपाति भार्येति भा वसिष्ठानन्दाना यातामीत्यनेकधा
ज्ञातियोगिधियांयो बिद्धिषते न स्वरूपतः नंदाभर्तृ भगिनी या
तादेवरपत्नी ज्ञातियोगिधिया भर्तृ श्वशुरदेवरादिलक्षणा ज्ञातियोगिगो

चरयावुध्यात् ज्ञानदपेक्षयेत्यर्थः ननु योषिद्विषयाणां मायस्तुपे
त्यादि ज्ञानान्नैवाभिनात्युपलभ्यंते नन्तौद्विषयभूतायोषितः स्वरूप
भेदोऽध्ययतेऽतः भ्रांतियोगसिध्यियायोषिद्विद्यते इत्युक्तमयुक्तं इति शं
कते नन्विति ज्ञानवैलक्षण्यायत्तस्य ज्ञेयवैलक्षण्यया विना मतत्वात् ज्ञेया
कार भेदोऽंगीकार्य एवेत्याशयेन परिहरति मैवमिति मैवं मांसमयी
योषित् काचिदन्या मनोमयी मांसमय्याम् अत्र भेदोऽपि भिद्यते हि मनो
मयी ननु भ्रांत्यादिस्थले बाह्यविषयाभावात्तत्रत्यं वस्तु मनोमयत्वात् भ्रांति
तस्थले तदनुपपन्नं बाह्यवस्तुनः सत्वादिति शंकते भ्रांतीति भ्रांति
स्वप्नमनोराज्यस्थलेति स्थलं मनोमयं ज्ञोपलभ्यमानेन मेयस्य न मनो
मयं चेति चेत् मानेन प्रत्यक्षादिप्रमाणो भेदो मेयस्य मानस्य भेदस्येत्यर्थः
भ्रमितस्थले बाह्यविषयसत्वमंगीकरोति बाढमिति वाढं

न

य

दि ४

मानेतु मेयत्नयोगात्स्याद्विषयाकृतिः भाष्यवार्तिककाराभ्यां मय

मर्थ उदीरितः कथं तर्हि तद्विषयस्य मनोमयत्वमुच्यत इत्यत आह

मानेत्विति मानेविषयाकृतिस्तुमेयत्नयोगात्संबंधात्स्यात् न

न्विदं स्वकपोलकल्पितमित्याशंक्याह भाष्येति तमेनार्थं भाष्य

कारवचनमुदाहरति मूषेति मूषायांसिक्तं यथाताम्रं तन्निभं जा

यते तथा रूपादीन्व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवं यथाद्रुतं

मूषायांसिक्तं ताम्रं तन्निभं जायते तन्मूषानाकारवद्भवति तथा

रूपादीन्विषयान्व्याप्नुवद्विषयीकुर्वन्चित्तं ध्रुवमवश्यं तन्नि

भं दृश्यत उपलभ्यत इत्यर्थः ताम्रादेरग्निसंपर्काद्द्रुतस्य मूषा

न्तःसिक्तस्य कठिनमूषाभिघातेन रोत्थापत्त्या मूषाकाराकारापित्तेः

छेरमूतायास्ताम्रादिविलक्षणाया विषयव्याभावापिकेतत्तदा

कापत्तिरित्याशंक्याद्युत्तरमाह व्यंजक इति व्यंजको वा यथालोके व्यंग्य
स्याकारत्वमभियात् सर्वार्थव्यंजकत्वाद्धीरर्थाकाराण्यवभासते यथा
वा व्यंजकः प्रकाशकः आलोकः आतपादिर्व्यंग्यस्य प्रकाश्यस्य घटा
देराकारतामारवर्तामियात् प्राप्नुयात् एवं धीरपि सर्वार्थस्य व्यंज
कत्वात् सकलपदार्थप्रकाशकत्वात् दर्पणाकाराचेत्स्याकार इव कस्याका
रो यस्याः सा तथाप्यवभासेत प्रकर्षेणोपलभ्यते इत्यर्थः इदानीं वार्त्ति
ककारवचनमाह मातुरिति मातुर्नाम अभिनिष्पत्तिर्निष्पन्नं मेयमे
तिनत् मेयाभिसंगतं तत्त्वमेयात्मत्वं प्रपद्यते मातृत्वाधिष्ठानबुद्धि
स्य चिदाभासरूपात्मनः मातुर्नाम अभिनिष्पत्तिर्मानस्य साभासान्तः
करणावृत्तिरूपस्याभिनिष्पत्तिर्भवतीति प्रोक्तः निष्पन्नमुत्सं
नं तन्मानं मेयं प्रमेयं घटादिरूपमेति प्राप्नोति किं च तन्मानं मेयया

पं॰ दशीटी॰ मित्संगत्वं ज्ञमेयेरासंबंधंसन्मेयाभत्वमेवस्याभेवामायस्यतन्मेयाभ प॰ दी॰ का

६४ त्वंतस्यभावत्तत्वंमेयसमानाधिकरणत्वं प्रपद्यते ज्ञात्वेतीत्यर्थः

64 भवतु प्रकृते किं मायात्वमित्यत आह सत्यं वामिति सत्यं वंवि

टी॰ वयोद्दोक्तो यमन्मय धीमयो मन्मयो मानमयं स्यात्स्याद्विभा
ष्यस्तु धीमयः ननु मन्मय घटस्यैव मनोमय घटस्यत्तैनैव म
नसाग्रहीतुं शक्यत्वात् यत्राह कांतरा भावाच्चासिद्धैरेवत्या प्रां
क्य ग्राह का मानो ऽप्रसिद्ध इत्याह मन्मय इति यथा मन्मयो मा
नमेयत्वाद्धीमयः साक्षिभास्य इत्यर्थः भवंत्वेवं द्विविधं द्वै
तं कस्तत्र कस्य हेमत्वं कस्य नानेति न ज्ञायत इत्याशंक्य जीवस्य
स्य हेयत्वमित्याभिप्रेत्य तस्य बंधहेतुत्वं दर्शयति अन्वये
ति अन्वयव्यतिरेकाभ्यां धीमयो जीवबंधकृत् सत्यस्मिन् सु

खदुःखे सत्सत्स्मिन्नात्ति मद्वयं अन्वयव्यतिरेकावेव दर्शयति ससाक्षि
क्षिति अस्मिंजीवस्वरूपे मा मसप्रयं चेसाति विद्यमाने सुखदुःख
स्त्तः भवतः अमाति तु नास्तिन्द्वयं सुखं दुःखं च नास्तीत्यर्थः न
न्वेत्तावन्वयव्यतिरेकौ बाह्यार्थविषयौ किं न स्यातां इत्यत आह
असत्यपि चेति असत्यपि च बाह्यार्थत्वगादौ बध्यते न र समा
धिस्त्रग्विमृष्टार्थ सत्यप्यात्मनि न बध्यते न रोमन्थः एतदुप
लक्षणमन्येषामपि स्वगादौ स्वप्नस्थत्यादिकाले बाह्यार्थे
ऽग्व्रकूलयोर्विद्यादो प्रतिकूलेव्याघ्रादौ च परमार्थिके विषये स
त्यपि अविमानेऽपि बध्यते सुखदुःखाभ्यां युज्यते समाध्यादि
युक्तास्मिं बाह्यार्थे सत्यपि न बध्यते न सुखदुःखाद्यभिभूत
वान्य तदेतावविषयावन्वयव्यतिरेकौ न तत्त्वरित्यर्थः मनोमयश्च

म्तेविततस्मिन् वार्तायामप्रस्तुतायां नरोदिति । पं० ३

पं०दशीटी० पंचस्य वंधकत्वेनाऽन्वयव्यतिरेकावुदाहरणेन स्पष्टयति इ प०दी०का
६५ रदेशमिति सार्द्धेन दूरदेशं गते पुत्रे जीवत्येवान्नतत्पिता विप्रल
म्भकवाक्येन मृतं मत्वा प्ररोदिति । अतः सर्वस्य जीवस्य वंधकत्मा
नमं जगत् देशान्तरं प्राप्ते पुत्रे नत्रैजीवत्येव सत्यपजस्य गृहे स्थि
तस्तस्यापिता विप्रलंभकस्याभिप्यापर वंधकस्यात्य मृत्रोमृतइ च
त्येवं रूपेण वाक्ये न स्वपुत्रं मृतं कल्पयित्वा प्रकर्षेणा करोति
तस्मिन्नेव पुत्रे तत्रैव मृत्तोपित्त नरोति का माथाम ख्कृतावां
सत्यां नरोदनं करोति फलितमाह अनइति धीमयस्यैव
जगतो वंधहेतुत्वाणीकारे बाह्यापिलापादव सिद्धांतापा
तः स्यादिति शंकते विज्ञानेति विज्ञानेति विज्ञानवादोवा
ह्यस्यविषयप्राप्तिः स्यादिहोति चेत् न हृद्याकारस्याधातृवाह्य

ह्यापेक्षितत्वतः परिहरति नप्रदीत येद्यपि मानसप्रपंचस्येव
बंधहेतुत्वं तथापि तद्धेतुत्वेन बाह्यार्थस्यापि स्वीकारान्नो विज्ञा
नवाद प्रसंग इति भावः ननु न ह्याकारस्य मपरिणाम बाह्यप
दार्थोपेक्षितात्वः पूर्वं पूर्वमानसप्रपंचसंस्कारस्यैव ततरो
त्तरमानसं प्रति हेतुत्वोपपत्तेरित्याशंक्य प्रौढवादेन मदंगीकारो

प्रपंच

त्रि वैयर्थ्यमिति वैयर्थ्यमस्तु वा वा ह्यं न वा स्थितत्वमी प्र
हे प्रयोजनमपदोतेन मानानीति हि स्थिति तर्हि विज्ञानवादत्वा
को भेद इत्यत आह बाह्यमिति विज्ञानवादिनो बाह्यमेवापल
पंति वयं तत्र प्रत्ययमेव भेद इत्यर्थः प्रयोजनशून्यत्वात् अभ्यु
पगमोप्ययुक्त एवेत्याशंक्याह प्रयोजनमिति मानाधीना वस्तुनः
सिद्धिर्न प्रयोजनाधीना मानसिद्धस्य प्रयोजनशून्यत्वस्य लौकिकैर

द्व = ३

 दिभिर्वाऽनभ्युपगमादितिभावः मानन्तद्वैतस्यैवबंधहेतुत्वेनास्य
 मनोनिरोधात्मक योगेनैवनिवृत्तिसंभवाद्ब्रह्मज्ञानस्यबंधनिवर्त्त

कत्वाऽभ्युपगमोविरुद्धएवेतिशंकते बंधश्चेदिति बंधश्चेन्मना
मं द्वैतं तन्निरोधेनशाम्यति अभ्यस्ययोगमेवातःब्रह्मज्ञानेनकिंव
द योगेनकिंद्वैतोपशमस्तात्कालिकउच्यतेआत्यंतिकोवेतिविकल्प
आद्यमंगीकृत्यद्वितीयंदूषयति तात्कालिकोस्ति तात्कालिकेद्वैत
ज्ञात्वैवेप्याऽस्मानिजाप्तेदयः ब्रह्मानंदंविनानश्यादितिवेदांता
डिंडिमाः ज्ञात्वादेवंमुच्यतेसर्वपाशैः ज्ञात्वाशिवंशांतिमत्यं
तमेति यदाचर्मवदाकाशंवेष्टयिष्यंतिमानवाः तदाशिवमवि
ज्ञायदुःखस्यांतोभविष्यतीत्यादिश्रुतिष्वन्वयव्यतिरेकाभ्यां
ब्रह्मज्ञानादेवबंधनिवृत्तिरभिधीयतइतिभावः ननुवाद्यद्वैतनि

वृत्तिमंतरेणाऽद्वितीयब्रह्मज्ञान■वनोदीयादित्याशंक्य तंनिवारणाभा
वेपितस्यमिथ्यात्वज्ञानाद्द्वैयास्माधिकमद्वैतबोद्धुंशक्यत इत्याह अ
निवृत्तेपीति अनिवृत्तेपीशास्त्रदृष्टद्वैतस्याप्रबाधात्मना बुद्ध्वाब्रह्माद्व
यंबोद्धुंशक्यंएवंस्वैक्यवादिनः नद्वैतमिथ्यात्वज्ञानमद्वैतज्ञानप्रयोज
कमपितुतंनिवारणामेवेत्यभिनिविष्टान्प्रत्याह प्रलय इति
प्रलयेतंनिवृत्तौतुगुरुशास्त्राद्यभावनः विरोधिद्वैतभावेपिनशक्यं
बोद्धुमद्वयंप्रलयेप्रलयावस्थायांतंनिवृत्तौतस्यद्वैतस्यनिवृत्तौस
त्यांतुविरोधिद्वैताभावेप्यद्वैतज्ञानविरोधित्वेनभवदभिमतस्यद्वै
तस्यनिवारणोसत्यापिगुरुशास्त्राद्यभावतः गुरुशास्त्रादिरूपस्य
ज्ञानसाधनस्याभावहेतोरद्वयंब्रह्मबोद्धुंशक्यं नभवतीत्यतस्तं
निवारणमप्रयोजकमितिभावः तथापिसतिद्वैतेकथमद्वैतज्ञान

मित्याशंक्याह अबाधकमिति अबाधकं साधकं चेद्वैतमीश्वरनिर्मि

तं अपनेतुमशक्यं चेत्याशंक्यातद्विष्यते कुतः ईश्वरनिर्मितं द्वैतमबा
धकं तन्नश्वरत्वज्ञानेनैवाऽद्वैतज्ञानोत्पत्तेरुक्तत्वात्साधकं च गुरुशा
स्त्रादिरूपस्य ज्ञानसाधनत्वादाकाशादिरूपं द्वैतमस्माभिरपनेतुम
शक्यं चेति हलोति द्वैतमाशंक्यात्कुतः कारणाद्विष्यत इत्यर्थः इदानीं जीव
स्रष्टं द्वैतं विभजते जीवेति जीवद्वैतं तु शास्त्रीयमशास्त्रीयमिति
द्विधा उपाददीत शास्त्रीयमातत्त्वस्याव बोधनात् किंद्विविधमपि
सदा हेयमेवनेत्याह उपाददीतेति आतत्त्वस्यावबोधनात्कृतत्त्वस्याऽ
वबोधनपर्यंतमित्यर्थः किंतच्छास्त्रीयं द्वैतमित्याकांक्षायामाह
आत्मेति आत्मब्रह्मविचाराख्यं शास्त्रीयं मानसं जगत् बुद्धे त
त्वे तच्च हेयमिति प्रत्यगात्मानं प्रत्यग्रूपस्य ब्रह्मणो विचाराख्यं

यच्चक्षुरादिकं तच्चक्षुरादीयं मानसं जगादित्यर्थः नन्वात्मतत्त्वस्याऽवबोध
नादित्यफलमनुपपन्नं आत्मनोऽमृतत्वे कालं नयेद्वैतदैवं चिंतयेत्फलात्वा
दित्याशंक्याह ब्रह्मेति तत्त्वे ब्रह्मात्मैक्यलक्षणे मात्यालोमत्तीत्यर्थः
नहि आसुप्तेरिति वाक्यस्य कागतिरिति चेत् दध्यानावसरं किंचित
कामादीनामनागवीतिपूर्वार्द्धं कामाद्यवसरप्रदानस्यनिषिद्धत्वात
त्परतैवेति वदामस्तत्त्वबोधोत्तरकालं तद्ध्येयत्वप्रतिपादनपराः श्रु
तीरुदाहरंति शास्त्राणीति शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः
पुनः परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत् तमेवैकं विजानीते
त्यनेन तमेवैकं विजानथ आत्मानमन्या वाचो विमुंचथ आत्मनमन्या
वाचो विमुंचथ अमृतस्यैषसेतुरिति श्रुतिरर्थतः पठति: आशा
स्त्रीयस्यापि ध्यानस्यावांतरभेदमाह आशास्त्रीयमिति ग्रंथमभ्यस्य मे

मे

धावीशानंविज्ञानतत्परः पलालमिवधान्यार्थीत्यजेद्ग्रंथमशेषतः प॰दी॰का
तमेवधीरोविज्ञायप्रज्ञांकुर्वीतब्राह्मणः नानुध्यायान्बहून्शब्दा
न्वाचोविग्लापनंहितत् तमेवैकंविजानीतह्यन्यावाचोविमुंचथ
यच्छेद्वाङ्मनसीप्राज्ञइत्याद्याःश्रुतयःस्फुटाः अशास्त्रीयमपिद्वै
तंतीव्रंमंदमितिद्विधा कामक्रोधादिकंतीव्रंमनोराज्यंतथेतरत् द्वि
धेति द्विविधमपिक्रमेणोदाहरति कामेति इतरन्मंदमित्यर्थः
किमनयोःशास्त्रीयद्वैतस्यवतत्वबोधोत्तरकालमेवहेयत्वंनेत्याह
उभयमिति उभयंतत्वबोधात्प्राङ्निवार्यंबोधायतिद्धये शमः
समाहितत्वंचसाधनेषुश्रुतंयतः प्राक्प्रानिवारणंकिमर्थमित्य
तआह बोधेति तत्रलिंगमाह शमइति यतस्तत्वबोधात्प्राक्तयो
र्निहियत्वंतत्तएवनित्यानित्यवस्तुविवेकादिब्रह्मसाधनेषुमध्ये

प्रांतः समाहित इति पदाभ्यां प्रांति समाधी प्रक्रतय इत्यर्थः तत्त्वबोधा
त् प्राक्तनि वर्त्यमित्यभिधानादुत्तरकालमस्य स्वीकार्यता स्यादित्याशं
क्याह बोधादिति बोधादूर्ध्वं तत्द्वयं जीवन्मुक्तिप्रसिद्धये कामादि
क्लेशबंधेन युक्तस्य नहि मुक्तता उक्तमर्थं व्यतिरेकमुखेन दृढयति
कामादीति कामादिरूपो यः क्लेशः स एव बंधः तेन युक्तस्य बद्धस्य मुक्ति
ता जीवन्मुक्तित्वं नहि नास्त्येवेत्यर्थः ननु जन्मादि संसारादुद्विग्नस्या
त्यंतिक पुरुषार्थरूपया विदेहमुक्त्यो वालं किमनया जीवन्मुक्त्येति शं
कते जीवन्मुक्तिरिति जीवन्मुक्तिरियं मा भूज्जन्माभावस्त्वहं कृती
न हि जन्मापि तत्त्वे वस्वर्गैकामाना कृतीभवान् ऐहिकभोगनि
वृत्तितया जीवन्मुक्तिरत्याग आरभ्य सांपिकयोगविवृत्ति भयादिह
मुक्तिरपि त्याज्या स्यादित्याप्रतिबंधापरिहरणे तद्दोषेति प्रतिबंध
मोचनं शंकते हायेति हा यानि श्रायदोषेणास्य गोहियो यदा तदा

वं॰ दशीति॰ स्वयंदोषत्त्वमात्मायंकामादिः किंनहीयते दोषमुक्तत्वेनस्वर्गा व॰ दी॰ का

६८ देस्त्याज्यतेसकलपुरुषार्थविघातकत्वेनाऽनीवदोषरूपस्यका

६९ मादेः स्तरांत्याज्यत्वमित्याह नदोस्वयमिति ननुवैराग्यादि

संपादनेनात्यंतानर्थहेतोः कामादेस्त्यक्तत्वादैहिकभोक्कमा।

त्रोपयोगिकामाद्यभ्युपगमेकोदोषइत्याशंक्याह त त्वा।

मिति नत्तुच्छापिकामादिभिः शोषंनहासिचेत्त यद्येस्म

चरणात्स्यात्कर्मध्वास्त्वातिलंघितः तत्ववित्वाभिमानेनाविधि

निषेधशास्त्रमतिक्रम्यकामाद्यधीनतयावर्तमानस्य नवयथे

ष्टाचरणंयदि प्रऽनतत्वदर्शोऽपिवकोभेदोऽश्वशुचिमदाम्नो

वै शुभ्राद्वैतमतलम तस्वरूपंब्रह्मतयेनमशुभ्राद्वैतसतत्वविन्न तस्ययथे

ष्टाचरणंयदिस्यात्तर्हितस्ववि मतत्वादिक पापिस्यात्तथ्यामाति।

स्यादित्यर्थः कःकोदोषइत्याप्रोक्तं नसत्वज्ञातिपादनपरं स्वरेश्वराचार्यवचनमुदाहरति शु

भ्राद्वैतेति शुभ्राद्वैतसतत्वस्ययथेष्टाचरणं नं

धडंतात चद्दशं चैवन — कोपिविद्रोषस्याद्दित्यर्थः एतावत्ताकिम
भिष्टमाषादितामित्याशंक्यलोपहासमुत्तरमाह वोधादिति वोधा
त्वरमतो दोषमात्राल्लिपर्वस्य याद्युना कात्रोषलोकनिंदा चेत्य
होतेवोधवैभवं तत्वज्ञानोदयान्नाक्ककामक्रोधादि चित्तदोषे
त्तिवक्षेपा भूत इदानीं सर्वलोकानिंदापिसइति ज्ञात्रावेरुरायमि
तिभावः तर्हि किं कनव्यमित्यतआह विद्वाविरा हेति विद्वरा
हदि तुल्यत्वमा कीर्तीनत्वाविद्वान सर्वघोदोषमत्यागपत्रमेः
प्रत्यदेववत सर्वोत्कि षहितेहतानवात्त्वं कामादित्यागाऽशक्तत्वेन
सर्वोघमाविड्वराहादि साम्यमाकांक्षीः किंतु कामादिलत्तत्यागात्त
कलमन्मेदोषहानेनसर्वजनेदेववत्पूज्यस्वप्रज्यो भवेत्यर्थः
तत्यागोपायमाह कामादीति कामादिदोषहृष्टाघाः कामादि

पं॰दशी॰टी॰ कामादित्यागहेतवः श्रुतिप्रमोक्षशास्त्रेषु नानाविधाः सर्वोऽप्यत्र काम्याः प॰दी॰ ७०
कामनाविषयाः स्रगादयः आदयो येषां द्व्यादीनां तत्कामादयस्तेषां
ये दोषाः अनित्यत्वसातिशयत्वादयस्तेषां दृष्टिः खलोकनमा
त्रं येषां कोपस्वरूपस्वरूपविचारादीनां ते तथोक्ताः कामादित्या
गहेतुत्वप्रमाणमाह श्रुतिरिति भवतु ततः किमायातमित्यत आ
ह तानिति ननु कामादीनां अनर्थहेतुत्वात् त्याज्यत्वमस्तु
मनोराज्यस्य तु तथात्वात् तत्त्यागो नापेक्षित इति शंकते त्या
ज्यतामिति साक्षादनर्थहेतुत्वाभावेऽपि परंपरया तद्धेतुत्वात्
त्याज्यत्वमेवेत्यभिप्रेत्य परिहरति अप्राप्तेति त्यज्यतामेव
कामादिर्मनोराज्ये तु का क्षतिः अशेषदोषबीजत्वात् क्षतिर्
भगवतेरिता परंपरयाऽनर्थहेतुत्वं प्रदर्शनपरं भगवद्वाक्यं

मुद्धाहरति ध्यायतो विषयान्पुंसः संगस्तेषूपजायते संगात्संजायते
कामः कामात्क्रोधोभिजायते तद्धस्य मनोराज्यस्य कः परिहारो
श्रा पायइत्यत आह जेतुमिति प्राकं मनोराज्यं निर्विकल्पसमा
धितः ससंपादः क्रमात्सोपि सविकल्पसमाधिना सोपि कुतः सि
ध्यतीत्यत आह ससंपाद इति नन्वाष्टांगयोगयुक्तस्य तस्यासक्त
हि: त इति तस्य कामनिरिन्नत्यत आह बुद्धतत्त्वेनेति बुद्धतत्त्वेन धीदोष
परत्वेनैकांतवासिना दीर्घप्रणावमुच्चार्य मनोराज्यं विजीयते बु
द्धमवगतं तत्त्वं [illegible] एकवलदत्तांयेन स बुद्धतत्त्वः तेन कामक्रोध
दि बुद्धिदोषरहितेन एकांतवासिना विजनदेशनिवासशीलेन गुरू
पदेशादीर्घं षडक्षरादपादि मात्राप्लुतप्रणावमोंकार मुच्चार्य मनोराज्य
विजीयते निवार्यते इत्यर्थः मनोराज्यविजयात्किं भवतीत्यत आह

त्तिः=

पं॰दशीटी॰ जितेतस्मिन्निति जितेतस्मिंवृत्तिप्रत्यंमनस्तिवृत्तिमूकवत् एतत्त प॰दी॰

७१ दं वसिष्ठेनरामायपद्युधेरितं। यथामूकः सकलवाग्व्यापाररहि

71 तस्तिष्ठति एवंमनोपिसर्वव्यापाररहितोपितिष्ठत इत्यर्थः अव

त्तिकमनोऽवस्थानस्यप्रकृष्टार्थंचेप्रमाणमाह एतत्पदमिति

एतत्पदमियंदेशेत्यर्थः वासिष्ठश्लोकद्वयमुदाहरति दृश्य

मिति दृश्यपर्यासत्तित्तिवेधेन मनसोदृश्यमार्जनं संपन्नं चेत्तदुत्प

न्नं परमानिर्वाणनिर्वृत्तिः नेहनानास्ति किंचनेत्यादिश्रुत्याऽद्वि

तीयब्रह्माऽतिरिक्तजगदभावज्ञानेनमनसः सकाशात्दृश्यपरि

दि॰ मार्जनंसंपन्नंचेदितिहिनिर्वाणमोक्षरूपंनिष्पन्नमितिजानीया

दि दित्यर्थः अद्वैतशास्त्रमत्यर्थं विचारितंतथापरस्परं गुरुशिष्या

दिसंवादधाराचिरकालंप्रत्यापितंच एवंकृत्याकिंनिश्चितमित्या

रति

तत्राह संत्यक्तेति विचारितमलं ग्रास्त्रं चेरमुक्तोहितंमिथ्यनसंत्यक्त
बंधनान्मोनाहंते नास्यकत्तमंपदं सम्यक्परित्यक्तकामादिवा
सनान्मनस्तत्त्वं मंगादते ऽधिकः प्रत्यार्थो नास्तीति निश्चित
मित्यर्थः एवं निश्चितिकस्यापि चित्तस्य चित्तप्रारब्धकर्मणा विदे
पेसति तत्प्रतीकारोपायः कइत्यपेक्षायामाह विक्षेपइति वि
क्षेपेपि नैकदाचित्त्वीः कर्मणा भोगदाद्विकं पुनः समाहितासाम्या
दैः= त्तैर्वाभ्यासपाटवात् पारदर्शिनो वेदांतपारंगताइत्यर्थः
अत्रापि वासिष्ठवाक्यमुदाहरति दर्शनादर्शनेइति दर्शनादर्शीहि
त्वास्वयंकेवलरूपतः यास्तिष्ठति सतिब्रह्मनब्रह्मनब्रह्मवित्स्वयं
योब्रह्मजानामिनेजानामीति व्यवहारद्वयपरित्यज्य स्वयमद्वैत
चेतनरूपेणावतिष्ठते सः स्वयंब्रह्मैव नब्रह्मविदित्यर्थः सफ

जीवद्वै=

पं·दशी· तद्द्वैतविवेचनं उपसंहरति जीवन्मुक्तेरिति जीवन्मुक्तेः पराकाष्ठा प·दी·का

७२ भिन्नविवेचनात् लभ्यते सा च तोऽत्रेदमीशद्वैतात् विवेचितम् इहैव

इति द्वैतविवेकः समाप्तः अस्या उक्तप्रकारा जीवन्मुक्तेः परा

काष्ठा निरतिशया यापर्यवसानभूमिः जीवद्वैतस्य मनोमयप्रपंचस्य

प्रा= वर्जनात् परित्यागात् लभ्यते एतेऽतः कारणादिदं जीवन्मुक्तेः ईशद्वैतमीश

द्वैतादीश्वरसृष्टद्वैतात् विवेचितं विविच्य प्रदर्शितमित्यर्थः ४

ॐ नत्वा श्रीमा· महावाक्यविवेकस्य कुर्वे व्याख्या समासतः

मुमुक्षो मोक्षसाधनब्रह्मात्मैकत्वाऽपवर्गत्वसिद्ध्ये प्रसिद्धानां

चतुर्णां महावाक्यानाम् अर्थक्रमेण निरूपयन् परमकृपालुराचार्यः

आदौ तावत् ऐतरेयवरशाखकगतं प्रज्ञानं ब्रह्मेति महावाक्ये प्र कपे

ज्ञानशब्दस्यार्थमाह येनेक्षत इति येनेक्षतशृणोतीदं जिघ्रति

व्याकरोति च स्वाद्वस्वादु विजानातीति तत्प्रज्ञानमुदीरितं येन चक्षु
र्द्वारा निर्गतां ऽन्तःकरणावृत्त्युपहितचैतन्येनेदं दर्शनयोग्यं रू
पादिकं सर्वं पश्यति पुरुषः तथा श्रोत्रद्वारा निर्गतां ऽन्तःकर
णवृत्त्युपाधिकेन शब्दजातं शृणोति तथैव घ्राणद्वारा निर्गता
न्तःकरणवृत्त्युपहितेनोपाधिकेन येन गंधजातं जिघ्रति येन गति
क्रियावाग्येनेव व्याकरोति शब्दजातं व्याहरति येन रसनेंद्रियद्वारा
निर्गतान्तःकरणवृत्त्युपाधिकेन स्वाद्वस्वादु विजानाति श्रुत्युक्त स
मस्तशब्दः तथा चोक्तानुक्तैः सकलेंद्रियैः अंतःकरणादृत्तिभे
द्वैः= देश्चोपलक्षितयच्चैतन्यमस्ति तदेवात्र प्रज्ञानमित्युच्यत इत्यर्थः एतेनैवे
ति वा पश्यति इत्यादेः सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानी
त्यंतस्यावांतरवाक्यसंदर्भस्यार्थः संक्षिप्य दर्शितः प्रज्ञानशब्दस्या

र्भ

एवं

पं॰दशी॰टी॰ र्थमभिधाय ब्रह्मशब्दार्थमाह चतुर्मुखेति चतुर्मुखेंद्रदेवेषु मनुष्या प॰दी॰का

७३ 73

श्वगवादिषु चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि उत्तमेषु देवा
दिषु मध्यमेषु मनुष्येषु अधमेष्वश्वगवादिषु देहधारिषु आका
शादिषु भूतेषु जगज्जन्मादिहेतुभूतं यदेकं चैतन्यमस्ति तद्ब्रह्मेत्य
र्थः अनेनैव एष ब्रह्मैष इन्द्र इत्यादेः प्रज्ञामात्रमिति इत्यंतस्यावांतरवाक्य
स्यार्थः सार्त्विप्रदर्शितः इत्थं पदार्थमभिधाय वाक्यार्थमाह
अत इति यत्तं सर्वत्र अवस्थितं प्रज्ञानं ब्रह्म अतो मय्यपि अवस्थितं प्रज्ञा
नं ब्रह्मैव प्रज्ञानत्वाविशेषादित्यर्थः एवं ऋग्वेदगतमहा
वाक्यार्थं निरूप्य यजुःशाखास्थं बृहदारण्यकोपनिषद्गतस्या

स्या ऽहं ब्रह्मास्मीति महावाक्यार्थं विवक्षुः तत्राहंशब्दस्यार्थमाह स्वा मा:

ह परिपूर्ण इति परिपूर्णः परात्मास्मिन् देहे विद्याधिकारिणि

बुद्ध्यादिसाक्षितया स्थित्वा स्फुरन्नहमितीयते परिपूर्णः स्वभावतो
देशकालवस्तुभिरपरिच्छिन्नः परमात्मा स्वस्मिन् मायाकल्पितज
गति विद्याधिकारिणि शमादिसाधनसंपन्नत्वेन विद्यासंपादन
योग्येऽस्मिन् स्ववर्णाश्रमस्थानवर्तिदेहे मनुष्यादिशरीरे बुद्ध्यु
पलक्षितस्य सूक्ष्मशरीरस्य साक्षितयाऽविकारत्वेनात्मकया त
स्थित्वाऽवस्थाय स्फुरन् प्रकाशमानोऽहमितीयते तद्द्वारायाऽहं
पदेनोच्यत इत्यर्थः ब्रह्मशब्दार्थमाह स्वत इति स्वतः पूर्णः
परमात्मा ब्रह्मपदेन वर्णितः अस्मीत्यैक्यपरामर्शनेन ब्रह्मैव
अस्म्यहं स्वतः परिपूर्णः स्वभावतो देशकालावच्छिन्नः पूर्वोक्तः पर घ
मात्माऽत्रास्मिन् महावाक्ये ब्रह्मशब्देन ब्रह्मेत्यनेन पदेन वर्णितः
लक्षणयोक्त इत्यर्थः एतद्वाक्यगतेनास्मीति पदेन पदद्वयसामा

पं॰दे॰वी॰टी॰ नाधिकरणत्वं तस्यं जीवब्रह्मणोरैक्यं प्रतिपादयन्नित्याह भूमसमीति प॰दी॰का

७४ फलितमाह तेनेति इदानीं छान्दोग्यवाक्ये तत्त्वमस्यादिवाक्ये सीति म॰

74 वाक्यस्याधिकारिणां नाम तत्पदलक्ष्यार्थमाह एकमेवेति सदेव वे॰

व सोम्येदमग्र आसीदेकमेवाद्वितीयमिति वाक्येन स्पष्टः । एकमे

वा वाद्वितीयं तु नामरूपविवर्जितं स्पष्टः । प्रागुत्पत्तेस्तु तद्ध्रुवं तदि

तीयेति प्रागुत्पत्तेरिदमेव ब्रह्म नामरूपरहितं यत्सत्तत्

प्रतिपादितमस्य तत्कालेनापि नाशः पुनरावृत्तिः कालमापि तदाह

कत्वविचारहृष्टाः तथात्वं नादीति पदेन प्रतिलक्ष्यत इत्यर्थः

त्वंपदलक्ष्यार्थमाह श्रोत्रादिति श्रोत्रः श्रवणाच्चक्षुषानेत्रवा

वचार्थप्रतिपन्नः देहेन्द्रियाणीति देहेन्द्रियादयस्तु स्थूला

दिशरीरत्रयस्यादिः तथा ताद्विलक्षणं सत वक्तुं तत्त्वंपदेरि

तत्कसो

लूः

ति वाक्यगतत्वमिति पदेन त्वद्वितमित्यर्थः एतद्वाक्यस्थेनाऽ
सि इति पदेन तत्त्वं तत्त्वंपदयोः सामानाकरण्यलब्धपदार्थद्वयैक्यं शि
ष्यं प्रति प्रत्याय्यत इत्याह एकत्वेति सिद्धमर्थमाह तदैक्यमि
ति तयोस्तत्त्वंपदार्थयोरैक्यप्रमाणासिद्धमेकत्वमनुसंधत्तांमुमु
क्षुरित्यर्थः क्रमप्राप्तस्याथर्ववेदगतस्याऽयमात्मा ब्रह्मेति
वाक्यस्यार्थं विविक्षुः स्वप्रकाशापरोक्षत्वं स्वयंप्रकाशत्वेनाप
त्वं = रोक्ष[illegible]मतमस्मि मत्कार्हस्त्यादिवन्नित्यपरोक्षं त्वं घटादिवद्दृश्य
त्वेन व्यावर्तयितुं विशेषणद्वयमिति बोद्धव्यं देहादिष्वात्म
शब्दप्रयोगदर्शनात् कथमात्मशब्देनाकिंचिकृत्तत्त्वमित्यपेक्षा
यामाह अहंकारादीति स्वप्रकाशापरोक्षतयाऽस्मि इत्युक्तितो
मतं अहंकारादिदेहान्तानां प्रत्यगात्मेति गीयते अहंकारः

क्षू

आदिर्यस्यआहंकारश्चमारामनइंद्रियदेहसंघातस्यमोहंका

रादिःतथादेहांतरीयस्यउक्तसंघातस्यसदेहांतःआहंकारादि

श्चासौदेहांतश्चेतियथातस्मात् प्रत्यगधिष्ठानतयासाक्षितया

चकाशमानआत्मेतिगीयतेऽस्मिन् वाक्यइत्यर्थः आत्मशब्दादि

ष्वपिब्रह्मशब्दस्यप्रयोगप्रदर्शनातथ्यावर्तनायात्रापिविवक्षित

मर्थमाह दृश्यमानस्येति दृश्यमानस्यसर्वस्यजगतस्तत्त्वमा

र्यते ब्रह्मशब्देनतद्ब्रह्मस्वप्रकाशात्मरूपकं दृश्यत्वेन

मिथ्याभूतस्यसर्वस्याकाशादेर्जगतस्तत्त्वमधिष्ठानतयातद

बाधानधिष्ठेनपारमार्थिकंसच्चिदानंदतदंघद्रूपमस्तितद्ब्र

ह्मशब्देनैवपतिकथ्यतइत्यर्थः वाक्यार्थमाह तद्ब्रह्मेति य

दुक्तलक्षणंब्रह्मस्वप्रकाशात्मरूपस्यरूपमस्यतत्त्वप्रका

पं. दयारी- शात्मक्रूपकंसल्पेत्यर्थः ३ [illegible] महावाक्यविवेक व्याख्या समाप्ता
॥ ॥धे॥शुभमस्तु

संवत्त १८८६ श्रावणशाञविषे २५ शुक्रवारे समाप्तम्

ला लि॰ पुरोहितमाधराम मुजमलिखारी मंदिर श्रीरघुनाथजी
पुस्तकालय जम्मूस्टेट्

इति पंचदशीटीका
पददीपिका समाप्तं
नं. ५७